**दिनाङ्क :- 12.10.2025**

**प्रात: - 06:55**

**<u>मोदी-अमेरीका राजदूत:</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः नवदिल्ल्यां स्वकीय निवास-स्थाने संयुक्तराज्यामेरिका-देशस्य भारते नियुक्तस्य राजदूतस्य सर्गियो गोर् इत्यस्य स्वागतं कृतम्। तस्य कार्यकालावधौ भारत-अमेरिका-व्यापक-वैश्विक-सामरिक-सहभागित्वम् इतोऽपि सुदृढं भविष्यति इति श्रीमोदी सामाजिकान्तर्जालीये सन्देशे दृढविश्वासं प्रकटितवान्। विदेशमन्त्री डा. एस्. जयशङ्करः अपि नवदिल्ल्यां भारते नियुक्तेन अमेरिकादेशस्य राजदूतेन सर्गियो गोर इत्यनेन सह भारत-अमेरिका-सम्बन्धयोः तथा तस्य वैश्विक-महत्त्वस्य विषये चर्चितवान्। सामाजिकान्तर्जालीये सन्देशे डा. जयशङ्करः अवदत् यत् सः श्री गोर्-वर्यस्य नूतनस्य दायित्वस्य कृते शुभाशयाः प्रार्थयति इति। पूर्वं विदेशसचिवः विक्रम मिसरी अमेरिकादेशस्य नियुक्तेन राजदूतेन सह मिलित्वा तस्य कार्यकालस्य सफलतायाः कामनाम् अकरोत्। एतदतिरिच्य, भारते नियुक्तः अमेरिकादेशस्य राजदूतः राष्ट्रिय-सुरक्षा-परामर्शदेन (एन्. एस्. ए.) अजित् डोबाल इत्यनेन सह वार्तालापम् अकरोत्। श्री गोर् वर्यः अवदत् यत् अमेरिका, भारतं च स्वतन्त्र-हिन्द-प्रशान्तक्षेत्रस्य प्रगतिं प्रति प्रतिबद्धौ स्तः।

**<u>प्रधानमंत्री - डेरियो अमोडेई</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदिल्ल्यां एन्थ्रोपिक्-संस्थायाः सी. ई. ओ., इति मुख्य कार्यकारी अधिकारिणा डेरियो अमोडेई इत्यनेन सह मेलनं कृतम्। एकस्मिन् सामाजिकान्तर्जालीय सन्देशे, श्रीमोदी एन्थ्रोपिक् इत्यस्य विस्तारस्य स्वागतम् अकरोत्, तथा च सः प्रमुखक्षेत्रेषु विकसाय ए. आई. इत्यस्य उपयोगाय मिलित्वा कार्यं कर्तुम् उत्सुकः अस्ति इति उक्तवान्।

**<u>कनाडा - विदेशमन्त्री</u>**

कनाडा-देशस्य विदेशमन्त्री अनीता आनन्दः अद्यारभ्य भारत-सिङ्गापुर्-चीन-देशानां राजनैतिकयात्रायां भविष्यति, कनाडा-देशस्य मन्त्रिणः यात्रा हिन्द-प्रशान्त-कार्यनीतेः भागरूपेण एतैः देशैः सह द्वैपाक्षिक-सम्बन्धान् सहयोगं च प्रवर्धनाय अस्ति। भारत-यात्रायाम् श्रीआनन्दः नवदिल्ल्यां विदेशमन्त्रिणा डा. एस्. जयशङ्करेण तथा वाणिज्य-उद्योगमन्त्रिणा पियूष गोयलेन सहापि मेलनं करिष्यति।

**<u>बिहार निर्वाचनम्</u>**

बिहार्-राज्ये, बिहार-विधानसभा-निर्वाचनस्य कृते महा-गठबन्धनस्य घटकदलानाम् अन्तः आसनविभाजनस्य व्यवस्थायाः निराकरणाय चर्चा अधुनापि प्रचलति। आर्. जे. डी. इति राष्ट्रिय-जनता-दलस्य अध्यक्षः लालू-प्रसाद-यादवः दलस्य प्रत्याशिनां

चयनाय दलस्य वरिष्ठनेतृभिः सह ह्यः मेलनं कृतवान्। अस्मिन् सभायां पूर्वकेन्द्रिय मन्त्रिणः पशुपति-कुमार-पारसस्य नेतृत्वे राष्ट्रिय-लोक-जनशक्ति-दलस्य, हेमन्तसोरेनस्य नेतृत्वे झारखण्ड्-मुक्ति-मोर्चा इति दलस्य च द्वयो: नूतन-दलयोः बिहार-विधानसभा-निर्वाचने प्रवेशस्य विषये चर्चा अभवत्। अस्मिन् विषये अन्तिमनिर्णयं स्वीकर्तुं दलः लालुप्रसाद् यादवम् अधिकृतम् अकरोत्। काङ्ग्रेस्-दलम् अपि पटना-नवदिल्ली-नगरयोः वरिष्ठनेतृभिः सह वीडियो-कॉन्फ्रेंसिंग इति आभासीय माध्यमेन उपवेशनं कृतवान्।

## क्रिकेटस्पर्धा

भारत-वेस्टइंडीज दलयोः क्रिकेटनिकष-शृङ्खलायाः द्वितीय-स्पर्धायाम् ह्यः द्वितीये दिने क्रीडावसानं यावत् वेस्टइंडीज दलेन प्रथमे पर्याये चतुर्णां क्रीडकाणां हानौ चत्वारिंशदुत्तरैकशतं धावनाङ्काः निर्मिताः। इतं पूर्वं भारतेन प्रथमे पर्याये पञ्चक्रीडकाणां हानौ अष्टादशोत्तर-पञ्चशतं धावनाङ्केषु प्रथमपाल्याः अवसानं घोषितम्। भारताय यशस्वी जायसवालः शुभमन गिल इत्यसौ च शतकीयम् अवदानं कृतवन्तौ।